# Vagishvaravarnana Stotram

# वागीश्वरवर्णनास्तोत्रम्

## Document Information

Text title : Vagishvaravarnana Stotram

File name : vAgIshvaravarNanAstotram.itx

Category : misc, buddha, stotra, ShaTkam

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 22, 2025

*sanskritdocuments.org*

# वागीश्वरवर्णनास्तोत्रम्

ब्रह्मादिदेवमनुजासुरपूजिताङ्गं ज्ञानादिसर्वनिलयं गुणराजवन्तम् ।
ज्ञानाधिपं गुणमयं गुणवृद्धिमन्तं वागीश्वरं सुरगुरुं सततं नमामि ॥ १॥

वेदादिशास्त्ररचनाखिलमन्त्रविज्ञं स्तोत्रैः कथादिभिरशेषसुगीतशब्दम् ।
यं कीर्ययन्ति मुनयो नरवाण्यभिज्ञं वागीश्वरं सुरगुरुं सततं नमामि ॥ २॥

ज्ञानप्रधानकशरीरमचिन्त्यबुद्धिं वाचस्पतिं दिवि भुवि स्तुतकीर्तिदं तम् ।
ज्ञानेश्वरं त्रिभुवनेशचराचरं तं वागीश्वरं सुरगुरुं सततं नमामि ॥ ३॥

रत्नादिशिल्पपरिकल्पनपूर्णज्ञेयं चित्रं विचित्रितगुणं जनमाननीयम् ।
सर्वज्ञकारकधराद् हृदि ब्रह्मपुञ्जं वागीश्वरं सुरगुरुं सततं नमामि ॥ ४॥

चर्याविधौ रतिपतिं स्थिरधैर्यबोधिं ध्यानाधिपं विविधिना सुखरञ्जनीयम् ।
विद्याप्रतिष्ठितगुरुं भुवनेतिपूर्णं वागीश्वरं सुरगुरुं सततं नमामि ॥ ५॥

वाणीपतिं भुजचतुष्टयबाणचापं पुस्तं कृपाणमनिशं क्रमशो दधानम् ।
सर्वेष्टदं जगति यच्चणारविन्दं वागीश्वरं सुरगुरुं सततं नमामि ॥ ६॥

इति श्रीवागीश्वरवर्णनास्तोत्रं सम्पूर्णम् ॥

*Vagishvaravarnana Stotram*

pdf was typeset on May 22, 2025

Please send corrections to *sanskrit@cheerful.com*